श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ त्रयोविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोविंशः सर्गः ॥

## मुनिना सह श्रीरामलक्ष्मणयोः सरयूगङ्गासङ्गमसमीपे पुण्याश्रमे नक्तं विश्रामः

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः।
अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥ **1.23.1** ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ **1.23.2** ॥

तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ **1.23.3** ॥

कृताह्निको महावीर्यौ विश्वामित्रं तपोधनम्।
अभिवाद्यातिसंहृष्टौ गमनायाभितस्थतुः ॥ **1.23.4** ॥

तौ प्रयान्तौ महावीर्यौ दिव्यां त्रिपथगां नदीम्।
ददृशाते ततस्तत्र सरय्वाः सङ्गमे शुभे ॥ **1.23.5** ॥

तत्राश्रमपदं पुण्यमृषीणां भावितात्मनाम्।
बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ **1.23.6** ॥

तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम्।
ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥ **1.23.7** ॥

कस्यायमाश्रमः पुण्यः को न्वस्मिन् वसते पुमान्।
भगवञ्छ्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ **1.23.8** ॥

तयोस्तद् वचनं श्रुत्वा प्रहस्य मुनिपुङ्गवः।
अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ **1.23.9** ॥

कन्दर्पो मूर्तिमानासीत् काम इत्युच्यते बुधैः।
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥ **1.23.10** ॥

कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम्।
धर्षयामास दुर्मेधा हुङ्कृतश्च महात्मना ॥ **1.23.11** ॥

अवध्यातश्च रुद्रेण चक्षुषा रघुनन्दन।
व्यशीर्यन्त शरीरात् स्वात् सर्वगात्राणि दुर्मते ॥ **1.23.12** ॥

तत्र गात्रं हतं तस्य निर्दग्धस्य महात्मनः।
अशरीरः कृतः कामः क्रोधाद् देवेश्वरेण ह ॥ **1.23.13** ॥

अनङ्ग इति विख्यातस्तदाप्रभृति राघव।
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह ॥ **1.23.14** ॥

तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा।
शिष्या धर्मपरा वीर तेषां पापं न विद्यते ॥ **1.23.15** ॥

इहाद्य रजनीं राम वसेम शुभदर्शन।
पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ **1.23.16** ॥

अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमम्।
इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम् ॥ **1.23.17** ॥

स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम।
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ **1.23.18** ॥

विज्ञाय परमप्रीता मुनयो हर्षमागमन्।
अर्घ्यं पाद्यं तथाऽऽतिथ्यं निवेद्य कुशिकात्मजे॥ **1.23.19**॥

रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियाम्।
सत्कारं समनुप्राप्य कथाभिरभिरञ्जयन्॥ **1.23.20**॥

यथार्हमजपन् सन्ध्यामृषयस्ते समाहिताः।
तत्र वासिभिरानीता मुनिभिः सुव्रतैः सह॥ **1.23.21**॥

न्यवसन् सुसुखं तत्र कामाश्रमपदे तथा।
कथाभिरभिरामाभिरभिरामौ नृपात्मजौ।
रमयामास धर्मात्मा कौशिको मुनिपुङ्गवः॥ **1.23.22**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रयोविंशः सर्गः॥